# Shri Shasta Stutidashakam

# શ્રીશાસ્તાસ્તુતિદશકમ્

## Document Information

Text title : shAstAstutidashakam

File name : shaastaastutidashakam.itx

Category : deities_misc, ayyappa, stotra, dashaka

Location : doc_deities_misc

Transliterated by : Antaratma antaratma at Safe-mail.net

Proofread by : Antaratma, PSA Easwaran

Latest update : July 10, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 10, 2021

*sanskritdocuments.org*

# શ્રીશાસ્તાસ્તુતિદશકમ્

આશાનુરૂપફલદં ચરણારવિન્દ-
ભાજામપારકરુણાર્ણવપૂર્ણચન્દ્રમ્ ।
નાશાય સર્વવિપદામપિ નૌમિ નિત્ય-
મીશાનકેશવભવં ભુવનૈકનાથમ્ ॥ ૧॥

પિઞ્છાવલી વલયિતાકલિતપ્રસૂન-
સઞ્જાતકાન્તિભરભાસુરકેશભારમ્ ।
શિઞ્જાનમઞ્જુમણિભૂષણરઞ્જિતાઙ્ગં
ચન્દ્રાવતંસહરિનન્દનમાશ્રયામિ ॥ ૨॥

આલોલનીલલલિતાળકહારરમ્ય-
માકમ્રનાસમરુણાધરમાયતાક્ષમ્ ।
આલમ્બનં ત્રિજગતાં પ્રમથાધિનાથ-
માનમ્રલોકહરિનન્દનમાશ્રયામિ ॥ ૩॥

કર્ણાવલમ્બિમણિકુણ્ડલભાસમાન-
ગણ્ડસ્થલં સમુદિતાનનપુણ્ડરીકમ્ ।
અર્ણોજનાભહરયોરિવ મૂર્તિમન્તં
પુણ્યાતિરેકમિવ ભૂતપતિં નમામિ ॥ ૪॥

ઉદ્દણ્ડચારુભુજદણ્ડયુગાગ્રસંસ્થં
કોદણ્ડબાણમહિતાન્તમદાન્તવીર્યમ્ ।
ઉદ્યત્પ્રભાપટલદીપ્રમદભ્રસારં
નિત્યં પ્રભાપતિમહં પ્રણતો ભવામિ ॥ ૫॥

માલેયપઙ્કસમલઙ્કૃતભાસમાન-
દોરન્તરાળતરળામલહારજાલમ્ ।
નીલાતિનિર્મલદુકૂલધરં મુકુન્દ-
કાલાન્તકપ્રતિનિધિં પ્રણતોઽસ્મિ નિત્યમ્ ॥ ૬॥

યત્પાદપઙ્કજયુગં મુનયોઽપ્યજસ્રં
ભક્ત્યા ભજન્તિ ભવરોગનિવારણાય ।
પુત્રં પુરાન્તકમુરાન્તકયોરુદારં
નિત્યં નમામ્યહમમિત્રકુલાન્તકં તમ્ ॥ ૭॥

કાન્તં કળાયકુસુમદ્યુતિલોભનીય-
કાન્તિપ્રવાહવિલસત્કમનીયરૂપમ્ ।
કાન્તાતનૂજસહિતં નિખિલામયૌઘ-
શાન્તિપ્રદં પ્રમથયૂથપતિં નમામિ ॥ ૮॥

ભૂતેશ ભૂરિકરુણામૃતપૂરપૂર્ણ-
વારાન્નિધે, વરદ, ભક્તજનૈકબન્ધો । (વારાન્નિધે પરમભક્ત)
પાયાદ્ભવાન્ પ્રણતમેનમપારઘોર-
સંસારભીતમિહ મામખિલામયેભ્યઃ ॥ ૯॥

હે ભૂતનાથ ભગવન્, ભવદીયચારુ-
પાદામ્બુજે ભવતુ ભક્તિરચઞ્ચલા મે ।
નાથાય સર્વજગતાં ભજતાં ભવાબ્ધિ-
પોતાય નિત્યમખિલાઙ્ગભુવે નમસ્તે ॥ ૧૦॥

ઇતિ શ્રી શઙ્કરભગવદ્પાદ વિરચિતં
શ્રીશાસ્તાસ્તુતિદશકં સમ્પૂર્ણમ્ ॥

Encoded by Antaratma antaratma at Safe-mail.net
Proofread by Antaratma, PSA Easwaran

*Shri Shasta Stutidashakam*

pdf was typeset on July 10, 2021

Please send corrections to *sanskrit@cheerful.com*